न्यधर्म्मेण सर्वेषां विशेषरूपाणां संग्रहे च । “सम्बन्धस्या-
नलुगमो न दोषायेति” दाय० श्रीकृष्णः । आनुलोम्य-
करणे, “कलौ त्वनुगमान्विति” इति स्मृतिः ।

**अनुगमन** न० अनु+गम–भावे ल्युट् । पश्चाद्गमने । “शवानु-
गमनाशौचं स्नानमात्रेण शुध्यतीति” स्मृतिः भर्त्तृशरीरा-
नुगमनमहं करिष्यामीति शु०त० रघु० ।

**अनुगव** न० गोःसदृश आयामः ‘यस्य चायाम’ इति समासे
नि०अच् । गवायामतुल्यायामयुक्ते शकटादौ ।

**अनुगवीन** त्रि० गोः पश्चात् पर्य्याप्तं वा गच्छति अनुगु–ख ।
गोः पश्चाद्गामिनि गोपाले । “अनुग्वलंगामीति” (पा०)
उक्तेः पर्य्याप्तगन्तरि च ।

**अनुगादिन्** त्रि० अनुगदति अनु+गद–णिनि । अनुवादके
स्त्रियां ङीप् । अनुगाद्येव स्वार्थे, “अनुगादिनष्ठक् च”
पा० ठक् आनुगादिकः तदर्थे ।

**अनुगामिन्** त्रि० अनुगच्छति अनु+गम–णिनि । पश्चाद्गन्तरि,
सहचरे च । स्त्रियां ङीप् । “दृष्ट्वा स्त्रियमिवायान्तीं
ब्राह्मणीमनुगामिनीमिति” रामा० ।

**अनुगुण** त्रि० अनुकूलो गुणो यस्य । अनुकूले, अनुगते, अनु
रूपे च । “अद्वैतं सुखदुःखयोरनुगुणं सर्व्वास्ववस्थासु
यदिति” उत्तरच० । अनुरूपः गुण उपकरणम् । योग्योप-
करणे “रसानुगुणतामेतीति” सा०द० । सदृशगुणयुक्ते त्रि० ।
“कान्तारतापसाविद्धू वंशकानुगुणौ मताविति” सुश्रुतम् ।
अनुगतः गुणं तन्त्रीरूपत्वं वा गुणानुरक्ते त्रि० तन्त्रीयुक्त-
वीणायां स्त्री ‘उत्कण्ठितस्य हृदयानुगुणा वयस्येति”
अनुगुणा वीणेति तदर्थः । गुणे विभक्त्यर्थे, गुणमनतिक्रम्य
वा अव्ययी० । गुणे इत्यर्थे, गुणानतिक्रमे च । तद्बो-
धकग्रन्थमधीते वसन्तादि० ठक् । आनुगुणिकस्तदध्ये-
तरि, तद्वेत्तरि च त्रि० ।

**अनुगुप्त** त्रि० अनु+गुप्–क्त । आच्छादिते । “अनुगुप्ता अप
आहृत्येति” गोभिलः “अनुगुप्ता आच्छादिता” इति रघु० ।

**अनुगृहीत** त्रि० अनुग्रह–क्त । कृतानुग्रहे ।

**अनुग्र** त्रि० न उग्रः । शान्तस्वभावे असमर्थे, अनुद्धते च ।
“भगमनुग्रो अध याति रत्नमिति” ऋ०७,३८,६, “अनुग्रः
असमर्थ” इति भा० ‘अनुग्रासश्च वृत्रहन् ऋ० ८,१,१४,
अनुग्रा अनुद्गूर्णा इति (भा०) उक्तेः अनुद्गूर्णे च ।

**अनुग्रह** पु०अनु+ग्रह–अप् । अभीष्टसम्पादनेच्छारूपे प्रसादे,
आनुकूल्ये, अनिष्टनिवारणपूर्व्वकेष्टसाधनेच्छारूपायामभ्यु-
पपत्तौ, “विरूपोऽक्षतनिःस्वासानामकृत्यापूर्व्वकं हि यत् ।
पूरणं दानमानाभ्यामनुग्रह उदाहृत” इत्युक्तलक्षणे दरि-
द्रादिपोषणे च । “निग्रहानुग्रहे शक्तः प्रभुरित्यभिधी-
यते” इति तन्त्रम् । “अनुग्रहं संस्मरणप्रवृत्तमिति”
कुमा० । “पादार्पणानुग्रहपूतपृष्ठमिति” रघुः । ग्रहो
ग्रहणं सूर्य्यादिग्रहो वा अनुगतस्तम् गति स० । ग्रहानुगते
सूर्य्यादिग्रहानुगे च त्रि० ।

**अनुग्राह्य** त्रि० अनु+ग्रह–ण्यत् । अनुग्रहार्हे “यदि तेऽह-
मनुग्राह्यो यदि स्मरसि मे गुणानिति” “सर्व्वथानुग्राह्यो
देवतानामसंशय” इति च रामा० ।

**अनुचर** त्रि० अनुचरति अनु+चर–ट स्त्रियां ङीप् अच् वा
स्त्रियां टाप् । सहचरे, पश्चाद्गामिनि, दासादौ, “व्रताय
तेनानुचरेण धेनोरिति” “अन्वेद्युरात्मानुचरस्य भावमिति
च” रघुः । अनुगतश्चरं दूतं गतिस० । दूतानुगे त्रि० ।
सेवके च, “गन्धर्व्वा गुह्यकायक्षा विबुधानुचराश्च ये” इति
मनुः “चत्वारि च शतान्यनुचराणामिति” कौ०ब्रा०
‘अप्सरसो महेन्द्रानुचरा दर्शेति “सौमित्रिसीतानुचर-
स्येति” भट्टिः । ‘पालागली सानुचर्य्यः शतेन शतेन” इति
कात्या० २०,१,१२, एतद्व्याख्यायां बहुशः अनुचरीशब्द-
प्रयोगस्तत्र द्रष्टव्यः पालागली दासपुत्री ।

**अनुचारक** त्रि० अनुचरति अनु+चर–ण्वुल् । अनुगन्तरि,
सेवके च । तस्य धर्म्यम् अण् । आनुचारिकम् सेवकधर्म्ये
कार्य्ये त्रि० ।

**अनुचित** त्रि० न–उचितः । अपरिचिते, अयुक्ते च ।

**अनुचिन्तन** न० अनु+चिन्ति–ल्युट् । अनुस्मरणे सततचिन्ता-
याम् “द्वादशे व्ययभावे च वैपरीत्यानुचिन्तनमिति ज्योति० ।

**अनुचिन्ता** स्त्री अनु+चिन्ति–अ । सततचिन्तायाम् ।

**अनुच्च** त्रि० न उच्चः विरोधे न०त० । उच्चताविरोधि-
निम्नत्ववति । ज्योतिषोक्ते ग्रहाणां नीचस्थाने च । तानि
स्थानानि उच्चशब्दे वक्ष्यन्ते ।

**अनुच्छिष्ट** त्रि० उद्+शिष–क्त न०त० । उच्छिष्टभिन्ने
आहार्य्यद्रव्यस्य भुक्तावशिष्टमुच्छिष्टं तद्भिन्ने ।

**अनुज** त्रि० अनु पश्चात् जायते अनु+जन–ड । पश्चाज्जाते
सहोदरे भ्रातरि । तादृश्यां भगिन्यां स्त्री । एका-
धिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुज” इति मनुः ।
“चचार सानुजः शान्त” इति रघुः “परिवेत्ता-
नुजेऽनूढे” इति मनुः ।

**अनुजन्मन्** पु० अनु जन्म यस्य । सहोदरे कनिष्ठभ्रातरि ।
“जननाथ ! तवानुजन्मनामिति” भारविः ।